**DRISHTIKON**, 15(1), RMC, MMC, DHARAN, ISSN: 2382-5456, 2025.

# पाणिनीयव्याकरणशिक्षणाय शारदाप्रभानिर्दिष्टव्याख्यानपद्धतिसमीक्षा

**भवानीशङ्करभट्टराईः, विद्यावारिधिः**

सहप्राध्यापकः

नव्यव्याकरणविषयस्य

ने. सं. वि. पिण्डेश्वरविद्यापीठस्य धरान-नेपालस्थस्य

Email: dikshitbhattarai072@gmail.com

https://doi.org/10.3126/dristikon.v15i1.77143

**लेखसारः**

व्याकरणविषयस्य शिक्षणमाख्यानरूपकादिशिक्षणापेक्षया महत् कठिनमिति सर्वेषामतिरोहितमेव। तत्रापि पाणिनीयं व्याकरणं सूत्रवार्तिकफक्किकादीनामुत्सर्गापवादादीनां जालेन, तज्ज्ञानोत्तरमेव प्रक्रियाबोधसम्भवेन, तच्छिक्षणाय समग्रविषयज्ञानापेक्षितेन, तच्छिक्षणसरणेर्बोधापेक्षितेन च दुष्करतरं जायमानं प्रतीयते। एतावद् दुष्करकार्यं सरलीकर्तुं शारदाप्रभाकारेण हरिप्रसादशर्माचार्येण २०६० तमे वैक्रमे ‘अष्टाध्यायी : शारदाप्रभाव्याख्या- महिता’ विरचिता। अस्यां व्याख्यायां व्याकरणशिक्षणस्याधुनिकी पद्धतिर्युक्तयश्च प्रयुक्ता दृश्यन्ते, अतो व्याख्यानमिदमाधुनिकतरं शैक्षणिकप्रयुक्तिप्रयोगेण सुबोध्यतरञ्च कारितुं यथासम्भवं प्रयत्नो व्याख्यात्रा कृतः। एतदध्ययनं तस्यां शारदाप्रभाव्याख्यायां व्याख्यात्रा प्रयुक्तानां शैक्षणिकविधीनाम्, प्रविधीनां युक्तीनाञ्च निभालनपूर्वकं तेषां युक्तायुक्तत्वसमीक्षणे, एतेन प्रयुक्ता पद्धतिः ग्रन्थसरलीकरणे समुपयुक्ता अस्ति न वेति पर्यालोचने च केन्द्रिता वर्तते। अतः शारदाप्रभाव्याख्यानेन प्रयुक्ताः पद्धतयो युक्तयश्चोपयुक्ता वर्तन्ते नवेति विवेचनमस्य मुख्यं विषयवस्तु। एतदर्थं प्रकृतेन व्याख्यानेनाष्टाध्यायीशारदाप्रभायां टीकायां काः काश्च शिक्षणपद्धतयः युक्तयश्च प्रयुक्ताः सन्ति ? तादृशीनां पद्धत्यादीनां व्याख्येयविषयेण सह कीदृशं सामञ्जस्यमस्ति ? एभिः पद्धतिभिर्युक्तिभिश्च को लाभ इत्यादि शोधप्रश्नं समुत्थाप्य समग्रेऽध्ययन एतेषामुत्तराण्यन्विष्टानि सन्ति। अध्ययनान्ते च शारदाप्रभायां व्याख्यायां निगमनव्याख्यानप्रवचनप्रश्नोत्तरविधीनां सुष्ठु प्रयोगः प्राप्यते, अमीभिः पद्धत्यादिभिः प्रकृता व्याख्या सरला जाता चेद् वैज्ञानिकव्याकरणपरम्परितानामन्येषां विधीनां प्रयोगेण चेयं साधारणतयोपकृतेति निष्कर्षः सम्प्राप्तः। तथैवोत्प्रेरणदृष्टान्तोदाहरणमूल्याङ्कनादीनां प्रयोगेण, प्राथमिकेभ्यो विशिष्टेभ्यश्च छात्रेभ्यः पृथक् पृथक्तया स्तरानुकूलं विषयचयनम्, विषयस्तरीकरणम्, भाषाप्रयोगे शब्दभाण्डागारचयनेऽवधानता, पाठ्यवस्तुविन्यासे रैखिकता चेत्यादीनां सरण्यादीनामुपयोगेन चेदं पूर्वव्याख्यानतो भिन्नतरं सरलतरञ्च जातं वर्तते। एवमेवात्र निगमनव्याख्यानप्रश्नोत्तरादीनां विधीनां प्रयोगसामञ्जस्यं सुदृढमितरेषान्तु सामान्यमस्तीत्यपि प्रकृतेनाध्ययनेन लब्धम्। प्रकृतव्याख्यानम्, अनेन प्रयुक्तो विधिः सरणिश्च प्राथमिकेभ्यो भिन्नशैल्या द्वितीयकेभ्यश्च तस्माद् भिन्नतरशैल्या क्रमशः पाठनाय निर्दिष्टा वर्तते । अतः सहस्राधिकपृष्ठसंरचिते प्रकृते विशाले ग्रन्थे प्राथमिकैः छात्रैः कथं प्रविष्टव्यमिति

संशयः प्राथमिके क्षणे जायते तथापि ग्रन्थे प्रविष्टे सरलभाषया, निर्देशप्रधानया शैल्या, तत्र स्पष्टतया निर्धारितेन क्रमेण, व्याख्यात्रा कृतेन पूर्णेन व्याख्यानेन च जिज्ञासवोऽवश्यं गन्तव्यं प्राप्नुवन्त्येव, अतः शैक्षणिकयुक्तिप्रविधिप्रयोगदृष्ट्या सञ्जातं प्रथमं व्याख्यानमेतद् इति वक्तुं शक्यं तत्र व्याख्यानपद्धत्यादीनामेव महत्त्वपूर्णमवदानं वर्तत इति निश्चितम् । अतोऽसौ पाठकलाभदायकं छात्रोपयोगि च वर्तत इति निष्कर्षः। प्रकृतेऽध्ययने भौतिकवैद्युत्पुस्तकालयाभ्यां सामग्र्यः सङ्कलिताः सन्ति । ताश्च वर्णनविश्लेषणादिभिर्विविच्य समीक्ष्य च तस्माद् निष्षर्षो निष्पादितो वर्तते। अत्र सन्दर्भाङ्कने सन्दर्भसामग्रीविन्यासे च एपिएशैल्याः सप्तमसंस्करणस्य नियमाः परिपालिताः सन्ति ।

*शब्दकुञ्जिका* अष्टाध्यायीक्रमः, पाणिनीयव्याकरणम्, शारदाप्रभाव्याख्या, सूत्रप्रक्रियाक्रमसङ्गमः

## विषयप्रवेशः

महर्षिणा पाणिनिना रचिताया अष्टाध्याय्या व्याख्या अनेकैरुत्तरवर्त्तिभिराचार्यैरनेकधा कृता। अष्टाध्याय्यां स्थितां जटिलतां स्फोरणाय सुकोमलमतिवतश्छात्रान् सरलतया विषयबोधाय रामचन्द्राचार्यादिभिः प्रक्रियाकृद्भिः, काशिकाकारादिभिः सूत्रक्रमानुसारि- व्याख्यातृभिश्चास्य व्याख्यानं बहुधा कृतं दृश्यते। तथापि सरलताकाङ्क्षिणां जनानामपेक्षा पूरिता न प्राप्यते। एतन्मध्ये सरलया सुबोधया च शैल्या अष्टाध्यायीव्याख्यानाय तस्य शिक्षणविधिनिर्देशाय च नेपालदेशोद्भवेन हरिप्रसादशर्माचार्येण प्रथमतः प्रक्रियाक्रमनिकट- वर्त्तिन्या पद्धत्या प्रथमतः ५३६ सूत्राणि तदन्तर्गताः प्रक्रिया च पाठनाय प्राथमिकः क्रमो निर्दिष्टः, तत्र प्रावीण्यं लभमानेषु छात्रेषु द्वितीये चरणेऽष्टाध्यायीक्रमेण सकलसूत्रपाठनाय द्वितीया सरणिर्निर्दिष्टा वर्तते। तादृशस्य क्रमद्वयस्य समुल्लेखो व्याख्यात्रा हरिप्रसादशर्माचार्येण 'अष्टाध्यायी- शारदाप्रभाव्याख्यामहिता' इत्यत्र कृताऽस्ति। व्याख्यानमसौ पूर्वव्याख्यानतो नितान्तं भिन्नं छात्रयोग्यतानुरूपं विषयव्याख्यायकञ्च प्रतीयते। अत्र सरलभाषया, सरलतो जटिलक्रमेण, स्थले स्थले छात्रनिर्देशनयुक्तिं च प्रयुज्य विषयाः प्रस्तुता दृश्यन्ते। विषयव्याख्यानेन सह शैक्षणिकसामग्रीप्रयोगाय, यथास्थानमुत्प्रेरणजागरणाय च छात्रा उपदिष्टा सन्ति। व्याख्यातासौ स्मारंस्मारं लौकिकोदाहरणदानेन छात्रान् विषयावगमयितुं प्रयतत इत्यस्य वैशिष्ट्यम्। एतावता शारदाप्रभाटीकेयं सहस्राधिकपृष्ठेषु विस्तृता वर्तते।

२०६० तमे वैक्रमवर्षे प्रकाशितेऽनेन व्याख्यानेन पाणिनीयव्याकरणप्रबोधाय सूत्र प्रक्रियापद्धत्योः समन्वयमूला मिश्रपद्धतिः प्रच्छन्नत्वेन सङ्केतिता दृश्यते। तत्पद्धतिविषये शब्दशास्त्रीयव्याख्यानतत्त्वदृष्ट्या शारदाप्रभाटीकायाः समीक्षणकार्येण विद्यावारिधिरुपाधिलब्धेन भवानीशङ्करशर्मणापि प्रवेशो न कृतः, अन्यैः समालोचकैः, व्याख्यातृभिरप्यत्रानुसन्धानं न कृतमिति विषयोऽयमननुसंहितो वर्तत इति निश्चीयते। पाणिनीयव्याकरणशिक्षणाय अद्यावधि यानि व्याख्यानानि, समालोचनानि च रचितानि तानि सर्वाणि विषयकेन्द्रितानि दृश्यन्ते। यद्यपि तैः कृतं व्याख्यानमपि सरलीकरणप्रयोजनायैव जातं प्रतीयते तथापि पाणिनीयसूत्राण्यद्यावधि कथन्न सुबोधया सरलया च शैल्या न बोधितानीत्यज्ञातविषयः। प्रश्नोऽयमनुसन्धातृषु पुनः पुनरनुसन्धानाय जागरयति। एतेन वैषयिकसारल्यमेव न पर्याप्तं तदर्थं भाषासु सरलता, विषयप्रतिपादनशैलीषु सरलता, व्याख्यानपद्धतिषु सौष्ठवता, उदाहरणानामाधिक्यम्, क्रमनिर्धारणे

सरलतो जटिलक्रमविन्यासः, पाठ्यवस्तुचयनेऽवधानता, विषयवस्तुसापेक्षं स्तरीकरणं तदनुकूलं शैक्षणिकक्रियाकलापनिर्धारणम्, मूल्याङ्कनप्रणालीव्यवस्थापनम् प्रभृतीनि नैकानि कार्याणि तत्र योजनीयानि भवन्ति । यद्यपि शारदाप्रभाव्याख्यानेऽपि पूर्वोक्ताः सर्वा व्याख्यानयुक्तयः प्रयुक्ता न दृश्यन्ते तथापि प्रकृते व्याख्याने कासाञ्चन शैक्षणिकपद्धतीनाम्, विधीनां युक्तीनाञ्च प्रयोगोऽस्पष्टतयापि परिलक्ष्यते। अतोऽस्मिन् लेखे शारदाप्रभाव्याख्यानेन प्रयुक्तानां शैक्षणिकयुक्तिपद्धत्यादीनां सगवेषणं तासां समीक्षणं विधास्यते।

**शोधप्रश्नः**

प्रकृतलेखो निम्नाङ्कितेषु शोधप्रश्नेषु केन्द्रितो वर्तते-

क) पाणिनीयव्याकरणशिक्षणाय शारदाप्रभया निर्दिष्टा व्याख्यानपद्धतय काः काः ?

ख) तत्र प्रयुक्तानां शिक्षणपद्धत्यादीनां व्याख्येयविषयेण सह कीदृशं सामञ्जस्यमस्ति ?

ग) किं तत्र प्रयुक्ताः शिक्षणपद्धतयो युक्तयश्च छात्रलाभाय प्रभवन्ति ?

**शोधोद्देश्यम्**

प्रकृतलेखो निम्नाङ्कितेषूद्देश्येषु केन्द्रितो वर्तते-

क) पाणिनीयव्याकरणशिक्षणाय शारदाप्रभया निर्दिष्टानां व्याख्यानपद्धतीनां निर्धारणे,

ख) तत्र प्रयुक्तानां शिक्षणपद्धत्यादीनां विषयेण सह सामञ्जस्यपरीक्षणे,

ग) तत्र प्रयुक्तानां शिक्षणपद्धतीनां युक्तीनाञ्च छात्रोपयोगित्वान्वेषणे।

**कृतकार्यसमीक्षा**

संस्कृतवाङ्मयान्तर्गतं पाणिनीयव्याकरणमधीयानाः तं शुध्यन्तश्च प्रायशो विद्वाँन्सो वैषयिकविश्लेषणे समीक्षणे नूतनविषयप्रतिपादने च निमग्नाः प्राप्यन्ते । तेषु विरला अनुसन्धातार एव व्याकरणशिक्षणस्य व्याख्यानस्य च विधिप्रविधिशिक्षणकार्यकलापादिनिर्धारणे तेन वर्त्मना पाणिनीयव्याकरणशिक्षणाय तदध्यापनसरलोपायान्वेषणाय चान्विषमाणाः प्राप्यन्ते। परं पाणिनीयव्याकरणशिक्षणाय सरलविधिप्रविध्यादीनामभावेन व्याकरणमिदं जटिलमिति प्रसिद्धिः संस्कृतक्षेत्रे सर्वत्र प्रथिता वर्तत एव, अत एव बहवः प्रविविक्षवः अष्टाध्यायी-लघुकौमुद्यादिषु ग्रन्थेषु प्रविश्यापि समग्रं ग्रन्थं पठितुं न प्रभवन्ति, छात्राणां व्याकरणाध्ययने मध्यत्यागे नैकविधेषु कारणेषु सत्स्वेकः सरलशिक्षणविधेरभावोऽप्येकः, अतः एव केचिद् भग्नाः सुध्युपास्यप्रयोगे, केचिद् भग्ना रामशब्दप्रयोगे, सर्वे भग्नाः कारकान्तप्रयोगे, कठिनदीक्षितकौमुदीफक्किकेत्यादि भणितिः प्रचलिता दृश्यते। संस्कृतव्याकरणशिक्षणाय पद्धतिनिर्देशकान्यनुसन्धानानि यद्यप्यद्यावधि बहूनि न सन्ति तथापि तत्सहयोगित्वेन जातानि कानिचन पूर्वकार्याण्यत्र कालक्रमेण प्रस्तूयन्ते।

माधवप्रसादपौडेलः *भाषापाठ्यक्रमः, पाठ्यसामग्री तथा शिक्षणपद्धतिः* (ई.२०००) नामके नेपालीभाषानिबद्धे पुस्तके भाषाशिक्षणार्थमुपयोगिनः- प्रस्तावित-वर्णनात्मको- त्पादनात्मकसदृशान् सामान्यपद्धतीस्तथा निगमागममौखिकसंरचनसम्प्रेषणात्मकसदृशान् विशिष्टाँश्च पद्धतीः पुरस्कुरुते (पृ.२७३-२९०)।

ललितपाठकः *पाणिनीयव्याकरणशास्त्रीयसूत्राणामनुशीलनम्* (ई.२०१५) इति शीर्षकयुते संस्कृतलेखे- पाणिनीयव्याकरणस्य वेदाङ्गत्वम्, व्याकरणान्तरापेक्षया सर्वश्रेष्ठत्वम्, ब्रह्मसूत्रादिसाम्यम्, वेदसम्मतमित्यादीनि वैशिष्ट्यानि प्रस्तौति (पृ.७९)।

भवानीशङ्करभट्टराईः *शब्दशास्त्रीयव्याख्यानतत्त्वदृष्ट्याऽष्टाध्यायीशारदाप्रभाव्याख्यायाः समीक्षणम्* (ई.२०१८) इति शीर्षकयुते विद्यावारिधिशोधप्रबन्ध एकत्र प्राह- शारदाप्रभा- व्याख्यायां न केवलं शास्त्रीयविषयाणां व्याख्यानमेव प्राप्यते, अपितु शिक्षाशास्त्रोक्तपद्धतिप्रयोगे सरलातिसरलतया व्याकरणशास्त्रीयाणां गभीराणां विशिष्टानाञ्च विषयाणां व्याख्यानपद्धतिरपि प्रस्तुता अस्तीति। तत्प्रसङ्गे स तत्र 'शारदाप्रभायां शिक्षाशास्त्रोक्तानां मान्यतानामनुप्रयोगः' इति शीर्षकद्वारा- उत्प्रेरणाया प्रयोगः, शैक्षणिकोपकरणप्रयोगः, दृष्टान्तप्रयोगः, स्तरानुकूलं विषयचयनम् (स्तरीकरणम्), मूल्याङ्कनम् प्रभृतीनां शिक्षाशास्त्रोक्तानां प्रविधीनां शैक्षणिकीनाञ्च युक्तीनां प्रयोगोऽत्र प्राप्यत इति सङ्केतयति। पुनश्च स प्राह- शारदाप्रभायां शब्दशास्त्रसम्बद्धेषु पूर्वव्याख्यानग्रन्थेष्वप्रयुक्ताः शिक्षाशास्त्रोक्ता आधुनिकमान्यता अनुपालिता दृश्यन्ते। तद्दृशशैक्षिकमान्यतास्वत्र उत्प्रेरणायाः प्रयोगः, शैक्षणिकोपकरणप्रयोगः, दृष्टान्तप्रयोगः, स्तरानुकूलं विषयचयनमूल्याङ्कनानि प्रमुखाणि सन्ति । यद्यप्येषां प्रयोगोऽत्र पारम्परिकविधिना कृतस्तथाप्यपूर्वत्वेन मौलिको मन्यत इति (पृ. ६९)।

महेशप्रसादभट्टः एवम् कृष्णप्रसादपोखरेलः *कार्यमूलकव्याकरणशिक्षणम् तथा व्याकरणशिक्षणस्य नूतनाऽवधारणा* (ई.२०२२) इति शीर्षकयुते नेपालीभाषानिबद्धे लेखे कार्यमूलक-व्याकरणविधिनाऽभ्यासादिभिर्व्याकरणशिक्षणार्थं निर्दिशति। तथैव व्याकरणशिक्षणे वर्णपदवाक्यानां शिक्षणमेव भाषाबोधाय न पर्याप्तमिति कथयन् तदर्थं सङ्कथनशिक्षणमप्यावश्यक| प्रतीयत इति सङ्केतयति (पृ.१)।

भवानीशङ्करभट्टराईः *संस्कृतव्याकरणशिक्षणस्याधुनातनविधयः* (ई.२०२३) इति शीर्षकयुते नेपालीभाषानिबद्धे लेखे संस्कृतव्याकरणशिक्षणे मुख्यतया- आगमननिगमनप्रदर्शन- व्याख्याविश्लेषणप्रश्नोत्तराख्या विधयः प्रचलिता दृश्यन्ते। तथैव प्रवचन-सूत्रपारायण-परम्पराप्राप्तनिगमप्रभृतयो विधयः सहायका भवितुमर्हन्तीति (पृ.१)।

इतोऽन्येऽपि लघुलेखाः प्रकृतविषयव्याख्यानाय रचिताः सन्ति परं ते विषयमिमं स्पष्टतया न पर्यालोचयन्तीति तेऽत्र न प्रस्तुताः ।

उपरि वर्णितान्यनुसन्धानानि लेखाश्च भिन्नप्रयोजनेन रचिता दृश्यन्ते, अतस्ते पाणिनीयव्याकरणशिक्षणाय पद्धतिनिर्देशे मार्गनिर्देशका भवितुं नार्हन्ति । माधवपौडेलमहोदयेन निर्दिष्टाः प्रस्तावितवर्णनात्मकप्रभृतयः सामान्या विधयः पाणिनीयव्याकरणशिक्षणाय न समर्थीभवन्ति चेद् तेन निर्दिष्टा विशिष्टाः पद्धतयोऽपि पाणिनीयव्याकरणशिक्षणार्थं कथमुपयोगिन्यो भवितुमर्हन्तीति स्पष्टतया सङ्केतिता नास्ति । तथैव ललितपाठकभवानी- शङ्करादीनामनुसन्धानान्यपि न तु पाणिनीयव्याकरणशिक्षणसम्बद्धे पद्धतिनिरूपणे न च शारदाप्रभाव्याख्यानिर्दिष्टपद्धतिनिर्देशे च उपयोगिनो दृश्यन्ते, अतः शारदाप्रभाटीका (व्याख्या) निर्दिष्टानां पाणिनीयव्याकरणशिक्षणाय मार्गदर्शकानां शिक्षणपद्धत्यादीनां समुल्लेखनमावश्यकं मत्वा प्रकृतलेखः प्रकल्प्यते।

## अध्ययन सामग्रीः एवम् विधिः

प्रकृतः शोधलेखः प्रायो द्वितीयकसामग्रीषु समाश्रितः, पुस्तकालयाश्रितश्च वर्तते । अस्मिन् शोधलेखे परिमाणात्मकानां तथ्याङ्कानामुपयोगो न विहितोऽतोऽयं गुणात्मकः । अत्र परम्परित–पुस्तकालयतः, वैद्युत्–पुस्तकालयतश्च सामग्र्यो गृहीताः सन्ति । ताश्च वर्णनात्मक–विश्लेषणात्मक–तुलनात्मकविधिभिर्विश्लिष्य, व्याख्याय, अन्यैः सह तोलयित्वा, सत्यापयित्वा च वस्तुतथ्यात्मको निष्कर्षो निष्पादितः। अस्मिन् क्रमे सामग्रीविश्लेषणस्य क्रमः प्रायो निगमनात्मको वर्तते। अत्र सन्दर्भाङ्कनसन्दर्भे, सन्दर्भसामग्रीसूचीनां समुल्लेखने च लेखकमितिपद्धतिः (APA 7th ed.) प्रयुज्यते । तथापि संस्कृतभाषासम्बद्धानां श्लोकसूत्रकारिकादीनां समुद्धरणे कतिषु स्थानेषु संस्कृतस्य परम्परिता पद्धतिरपि क्वचिदुपयुक्ता वर्तते।

## विषयविश्लेषणम्

विषयविश्लेषणमिति नामधेये प्रकृते खण्डे शारदाप्रभाटीकाकारेण निर्दिष्टाः पाणिनीयव्याकरणशिक्षणार्थमुपयोगिनीः पद्धतीः, युक्तीः, विधीँश्च समुल्लिख्य तेषां व्याख्येयविषयेण सह सामञ्जस्यं शारदाप्रभाटीकाकारेण निर्दिष्टानां पद्धत्यादीनां छात्रोपयोगित्वञ्चात्र क्रमशोऽन्विष्यते।

### निगमनविधेः प्रयोगाधिक्यम्

व्याकरणशिक्षणस्य परम्परायां विधौ/पद्धतौ (अत्र विधिपद्धत्योः प्रयोगः पर्ययेण कृतः) निगमनागमनञ्चेति द्वे उपपद्धती प्रसिद्धे स्तः। तत्र तथ्यसङ्कलनविश्लेषणादिभिः तथ्यनिस्सारणमागनं चेत् तद्विपरीतं किमपि नियमं सिद्धान्तं सूत्रादिकं वा पुरत उपस्थाप्य समस्याया अध्ययनं ततो निष्कर्षनिष्पादनं निगमनम्। पूर्वे आचार्यपाणिनेः पश्चिमे चारिस्टोटलमहोदयतः प्रारब्धायामेतायां पद्धतौ सामान्यीकृतसिद्धान्ताधारेण तथ्यं सामग्री वा विश्लिष्यते। अतोऽस्यां पद्धतौ नवीनसिद्धान्तो न स्थाप्यते अपि तु तस्य पुनः पोषणमेव विधीयते अथवा सिद्धान्तसंशोधनीयोऽस्ति चेत् तत् परामृश्यत इति मोहनराजशर्मा स्वकीये शोधविधि नामके पुस्तके समुल्लिखति । अतः शारदाप्रभाव्याख्यानमिदं स्पष्टतोऽष्टाध्याय्याः

सूत्राणां तन्निर्दिष्टप्रक्रियाणाञ्च विवेचकम् । अत्रैकं सिद्धान्तसूत्रं वर्तते- अचो यत् (पा.स. ३-१- ९७) इति। शास्त्रमिदं अजन्ताद्धातोः परतो यत् प्रत्ययं साध्नोति । अस्योदाहरणानि चेयं जेयमित्यादीनि। व्याख्यायामस्यां तु सकलसूत्राण्येव सिद्धान्तान् विशदयन्ति, तदनु सूत्रसङ्केतानुसारेणोदाहरणानि प्रत्युदाहरणानि च समागच्छन्ति, एतैरुदाहरणप्रत्युदाहरणैः स्थापितसिद्धान्तः पुनरपि पुष्यते, अतो निगमनपद्धतेरधिक- प्रयोगोऽस्तीति निश्चित्य वक्तुं शक्यते।

निगमनपद्धतेरेकमुदाहरणं प्रस्तूयतेऽत्र ढ्रलोपे पूर्वस्य दीर्घोऽणः (पा. सू. ६-२-१११ ) इति। प्रकृतसूत्रे- ढ्रलोप इत्यत्र द्वौ ढकाररेफौ लोपयतीति ढ्रलोपः, तस्मिन् ढ्रलोपे ढकाररेफयोर्लोपे निमित्तयोर्दकाररेफयोः परतः पूर्वस्य अणः स्थाने दीर्घो भवतीत्यर्थबोधनक्रमे सूत्रव्याख्यायां- ढकारलोपनिमित्तके ढकारे परे रेफलोपनिमित्तके रेफे च परे पूर्वस्याणो दीर्घो भवतीति। अथ सूत्रसमन्वये लीढः। व्याख्यात्राऽत्र प्रथमं पाणिनिर्दिष्टः सूत्रात्मकसिद्धान्तो ढ्रलोपे पूर्वस्य... इति प्रस्तुत्य व्याख्यातः। तदनन्तरं लीढ इत्युदाहरणं प्रस्तुतम्, उपर्युक्तसिद्धान्ते समन्वयीकृतञ्च, अतोऽत्र निगमनपद्धतेः प्रयोगः स्पष्टतया दृश्यत इति वक्तुं शक्यते। अन्यत्रापि पाणिनीयसूत्रव्याख्याने प्रायो निगमनपद्धतिप्रयुक्ता दृश्यते।

**वैज्ञानिकविधेः सामान्यसङ्केतः**

परम्परितशिक्षणपद्धतिविरुद्धं व्यवस्थिततया सामग्रीः सङ्कलय्य ता वस्तुगतरीत्या तथ्यपरकतया शृङ्खलाबद्धतया च विश्लिष्य सामान्यीकरणं ततो निष्कर्षनिष्पादनञ्च वैज्ञानिकपद्धतिरिति तद्विज्ञाः कथयन्ति । अस्याः शुभारम्भः चाल्सडार्विनमहोदयोऽकरोत् । महोदयोऽसौ आगमननिगमनात्मकेति पद्धतिद्वयं सम्मिश्रीकृत्य तत्राधुनिकपद्धती अपि संयोज्य वैज्ञानिकपद्धतिमिमां प्रणिनाय । विज्ञानक्षेत्रे प्रसिद्धेयं पद्धतिः कालान्तरे भाषाव्याकरणसाहित्यादिष्वपि लोकप्रियतामवाप। अस्यां पद्धतौ मूलतः सामग्र्या अवलोकनम्, अध्ययनम्, वर्गीकरणम्, विश्लेषणम्, सत्यापनञ्च विधाय निष्कर्षनिष्पादनं विधीयते। प्रथमतोऽवलोकनं ततः प्राक्कल्पनाया निर्धारणं तदनु परीक्षणं सत्यापनञ्चास्याः पद्धतेरङ्गानीति मोहनराजशर्मा सङ्केतयति । अनया पद्धत्या कृतमनुसन्धानं सुनिश्चितं सुव्यवस्थितं वस्तुगतम्, प्रामाणिकम्, मापनीयम्, सार्वजनीनम्, संशोधनीयम्, प्रविधियुक्तम्, पूर्वानुमेयम्, विशिष्टतया व्याख्येयञ्च भवतीति शर्मणः कथनं वर्तते। समस्याया अवबोधः, तस्याः पारिभाषिकीकरणम्, प्राक्कल्पनानिर्माणम्, सामग्रीसङ्कलनम्, तत्संयोजनम्, विश्लेषणं ततो निष्कर्षनिष्पादनं सामान्यीकरणञ्चात्र विधीयत इति गवेषणक्षेत्रे प्रकृतायाः पद्धतेर्महन्महत्त्वं वर्तते। वैज्ञानिकपद्धतावपि ऐतिहासिकी, वर्णनमूला, प्रयोगात्मिका, तुलनात्मिका, विश्लेषणात्मिका, अन्तरविषयात्मिका चेति कृत्वा मूलतः षड् उपपद्धतय सन्तीति मोहनराज शर्मा समुल्लिखति। तासु विश्लेषणात्मिकायाः पद्धतेः प्रयोगः शारदाप्रभाव्याख्याने सामान्यतो दृश्यते, यद्यपि कतिपये गवेषकाः सङ्कलितसामग्रीणां व्याख्याने, वर्गीकरणे, विश्लेषणे मूल्याङ्कने च सामान्यतः सर्वासु पद्धतिषु एषा प्रक्रिया भवतीत्युक्त्वा सा भिन्ना पद्धतिर्नास्ति अपि तु प्रक्रिया इति भाषन्ते तथापि व्याख्येय-विश्लेषणीयसामग्र्या उपयोगो भवतीति एता अपि पद्धतित्वेन पृथङ् निर्दिश्यते। शारदाप्रभायां विश्लेषणपद्धतेरुपयोगो बहुत्र कृतो दृश्यते। व्याख्याता हरिप्रसादोऽसौ- हल्ङ्याब्भ्यः... (पा. सू. ६-१-६६ ) सूत्रव्याख्याने, एङ्ह्रस्वात् सम्बुद्धेः (पा.सू. ६-१-६७) इति सूत्रे, अभ्यासे चर्च (पा.सू. ८- ४ - ५३) इत्यत्र, ख्यात्यात् परस्य (पा.सू. ६-१-१०८) इत्यत्र,

अतो रोरप्लुतादप्लुते (पा. सू. ६-१-१०९) इत्यत्र, वृद्धिरेचि (पा. सू. ६ - १ - ८५ ) इति सूत्रे च विश्लेषणपद्धतिमुपयुङ्क्ते। एतेषु सूत्रेषु विषयं विशदयन् व्याख्यातासौ तालिकाचित्रादिकं प्रस्तौति, महाभाष्यकाशिकाकौमुद्यादीनां व्याख्यानमुपस्थाप्य तैः सह विमृश्य च शङ्कां समाधत्ते । तत्रत्येषु विषयेषु सर्वत्र व्याख्यानमेवास्तीति कथनं न पर्याप्तमत तत्तत्स्थलेषु विश्लेषणात्मिका पद्धतिरपि स्वीकृतेति वक्तुं शक्यते । अन्यासु वैज्ञानिकपद्धतिषु तुलानात्मिकायाः पद्धतेः सामान्यसङ्केतो दृश्यते। परं व्याख्यानमिदं तुलनायां न समर्पितमपि तु विषयस्य सरलीकरणे, जनसाधारणीकरणे समुद्दिष्टं अतः साङ्केतिकरूपेण प्राप्ता तुलना प्रासङ्गिकी एव न तु उद्देश्यानुरूपा इति वक्तुं शक्यते। शिक्षाग्रन्थे समुद्दिष्टा निगमनातिरिक्ताः श्रुतिभाषिक्याद्यः विशिष्टा उपपद्धतयो वर्णनात्मिकाद्याः सामान्या उपपद्धतयश्चात्र स्पष्टतया न दृश्यन्ते।

**व्याख्यानविधेर्बहुशः प्रयोगः**

व्याख्यानं नाम विषयस्य विशदीकरणम् । तदर्थमाचार्यैः पञ्च वा षड्तत्त्वानि समुपदिष्टानि, यथा- विषयप्रस्तावः, विशयः (प्रस्ताविते विषये संशयः), पूर्वपक्षप्रस्तुतिः, उत्तरपक्षेण तत्खण्डनम्, प्रस्ताविते विषये सङ्गतिश्च। अथवा पक्षान्तरे- पदच्छेदः, पदार्थोक्तिः, विग्रहः, वाक्ययोजना, आक्षेपः समाधानञ्चेति। उपयुक्तयोर्व्याख्यानतत्त्वयोर्मध्ये शारदाप्रभायां द्वितीयतत्त्वानां प्रयोगोऽधिकतया प्राप्यते । यद्यप्यत्र सूत्रादीनां व्याख्याने सर्वत्राक्षेपपूर्वकं समाधानं प्रस्तुतं नास्ति तथाप्यवशिष्टानां पदच्छेदादीनां सप्रयोगं व्याख्यानं शारदाप्रभाकारेण स्मारं स्मारं कृतं प्रतीयते। तत्र व्याख्यात्रा व्याख्यानकौशलानां- सरलभाषाप्रयोगः, वाक्यक्रमे प्रवाहशीलता, विषयस्य क्रमविन्यासः, सूक्तिदृष्टान्तचित्रादीनामुल्लेखः, दृश्यश्रव्यसाधनप्रयोगः, इत्यादीनां सामान्यप्रयोगोऽकारि।

शारदाप्रभायामुपर्युक्तस्य द्वितीयस्य व्याख्यानविधेः प्रयोगः- मिदचोऽन्त्यात् परः (१-१-४६), भासनोपसंभाषाज्ञानयत्नविमत्युमन्त्रणेषु वदः (१-३-४७), धातोः कर्मणः समानकर्तृका- दिच्छायां वा (३-१-७), वृद्धिरेचि (६-१-८५), आटश्च (६-१-८७), उस्यपदान्तात् (६-१-९३), सन्वल्लघुनि चङ्परेऽनग्लोपे (७-४-९३), पूर्वत्रासिद्धम् (८-२-१) प्रभृतिषु शताधिकसूत्रेषु प्राप्यते। तेभ्यो वृद्धिरेचिरिति सूत्रस्य व्याख्यानसरणिरत्र चर्च्यते।

वृद्धिरेचीति सूत्रं व्याख्यायता शारदाप्रभाकारेण निम्नव्याख्यानतत्त्वानि प्रयुक्तानि-

क) **क्रमसङ्केतः**- वृद्धिरेचीति सूत्रं वृद्धिरादैच् (पा.सू.१-१-१) इति सूत्रानन्तरं पाठ्यम् ।

ख) **अनुवृत्तिस्रोतोनिर्देशः**- वृद्धिरेचीति सूत्रं पाठयता क-ख-गक्रमेण श्यामपाट्यां क्रमशः- एकः पूर्वपरयोः (पा.सू.६-१-८१), आद् गुणः (पा.सू.६-१-८४) इति सूत्रद्वयं पूर्वत्र लेख्यम्। तदनु गक्रमे वृद्धिरादैच् (पा.सू.१-१-१) सूत्रं लेख्यम्।

**ग) अनुवृत्तिप्रक्रियादिग्दर्शनम्-** अत्र आद् गुण इत्यस्माद् आत्, एकः पूर्वपरयोरित्यस्मात् पूर्वपरयोरेक तथा वृद्धिरादैच् इत्यस्माच्च वृद्धि इत्यस्यार्थ आगच्छतीत्यनुवृत्तिदिग्दर्शनम्।

घ) **सूत्रपदच्छेदः**- वृद्धिः, एचि।

ङ) **दृष्टान्तप्रयोगः**-स्त्रीलिङ्गीयेन वृद्धिरिति पदेन सह योगादेक इत्यस्यापि स्त्रीत्वं (एका जातम्) इति कुल्या दृष्टान्तद्वारा बोधः।

च) **श्यामपाटीप्रयोगः-** श्यामपाट्यां सूत्रानुवृत्तिक्रमस्य, सूत्रोदाहरणस्य चोल्लेखः।

छ) **चित्रद्वाराऽपवादबोधः-** अन्तःस्थितेन श्यामबोधकेन कवृत्तेन बहिस्थितः रामबोधको खवृत्तो बाध्यत इति चित्रप्रदर्शनमाध्यमेनोत्सर्गापवादयोर्बाध्यबाधकभावबोधः। प्रकृतप्रसङ्ग आद् गुण उत्सर्गं वृद्धिरेचीत्यपवादेन बाधात् वृद्ध्या गुणबाध इति भावबोधः।

एवंविधा व्याख्यात्रा हरिप्रसादेन शारदाप्रभाव्याख्याने नूतनशैल्या व्याख्यानविधिः प्रयुक्तो दृश्यते ।

**क्वचिद् व्याकरणविधेरपि प्रयोगः**

व्याकरणविधिरयं तत्रत्यसूत्रवार्तिकादिसापेक्षं रूपरचनां तदनुकूलं वाक्य- निर्माणादिकञ्चनुशास्ति । तथैव विधिरयं निगमप्रधानत्वेन तदनुकूलतया औपचारिकभाषां कथ्यभाषापेक्षया मानकलेख्यभाषाम्, विषयवस्तुबोधने कण्ठस्थीकरणमूलां परम्परितां पद्धतिम्, प्रयोगात्मिका शिक्षणपद्धतिविरुद्धं प्रवचनात्मिकां पद्धतिञ्चापेक्षते, अस्मात् कारणाद् विधिरयं श्रवणवाचनादिप्रशिक्षणकलापेक्षया लेख्याकलामेव विशेषयतीत शिक्षाविद उद्घोषयन्ति। शारदाप्रभाव्याख्येयं परम्परितपद्धतिमनुकृत्य लिखितत्वादत्र शिक्षाशास्त्रनिर्दिष्टा आधुनिकविधयः पद्धतयश्च प्रायो न प्राप्यन्त इति निश्चितमेव। तथापि व्याकरणविधिस्तु संस्कृत-ल्याटिन - ग्रीकादिभाषासम्बद्धव्याकरणे निबद्धोऽस्ति, पाश्चात्यजगति षोडशशताब्द्यां भर्जिल-ओडिसी सिसेरोप्रभृतिभिर्मनीषीभिर्लिखितं पुस्तकमाधृत्यास्य निर्माणः कृतः। तत्तत्देशीयेषु व्याकरणविद्यालयेषु (Grammar School) च परीक्षितश्चेति केदारप्रसादशर्मा सूचयति अतः शारदाप्रभायामस्य बहवो नियमाः साम्यं भजन्ति।

व्याख्यानमिदं प्रथमतः सूत्रवार्तिकादिकं समुल्लिख्य व्याख्याय च तदनु उदाहरणप्रत्युदाहरणानि शङ्कासमाधानादीनि च प्रस्तौति। प्रवचनपूर्णायां शैल्यां तत्रत्यविषयान् लेखनमाध्यमेन पुनः पुनरभ्यासकरणाय चासौ प्रेरयति, तेन प्रत्याहारशिक्षणसन्दर्भे प्रस्तुतं निर्देशनमित्थमस्ति "हल्प्रत्याहारगर्भ्याः प्रश्नाः देयाः तत्र मुहुर्मुहुरभ्यासः कारयितव्यः । अभ्यासश्च लेखनद्वारा न तु घोषणद्वारा... । इत्थं लेखनेऽभिप्रेरणं व्याकरणविधेरेव वैशिष्ट्यमिति निश्चिततया वक्तुं शक्यते । अइउण् इत्यादिसूत्रव्याख्यानसन्दर्भेऽपि बोधपूर्वकं कण्ठस्थीकरणमेव समुचितमिति छात्रानुपदिशन् व्याख्याताग्रे वक्ति - "पूर्वं वर्णसमाम्नायसूत्राणां कण्ठस्थीकरणं तत्पश्चादेव शिक्षकैः प्रत्याहारादीनामुपदेश इति प्रायोऽद्यत्वे शिक्षणपरम्परा वर्तते । परन्तु सा न पुरातनी शुद्धा प्रणाली यतोऽर्थबोधं विना निगदपाठो बुद्धिमान्द्यायैव भवति । तथैवात्र व्याकरणविधेरनुकुलतायै प्रवचनात्मिका शिक्षणरीतिरङ्गीकृता दृश्यते, तद्यथा- "इतः परं स्थानान्युपदेश्यानि, उपदेशसन्दर्भे गावः कुत्र वसन्तीति प्रश्नः कार्यः । " एतादृशी प्रवचनप्रधाना शैली यत्र कुत्रापि प्राप्तुं शक्यते, व्याख्यात्रा औङ आपः (पा. सू. ७-१-१८) इति सूत्रे, नपुंसकाच्च (पा. सू. ७-१-१९) इति सूत्रे, अथातो हलन्तशब्दा उपदेश्या (पृ. ५८३-५८४) इत्यत्र, एकाच उपदेशेऽनुदान्तात् (पा.सू. ७-२-१०) इति सूत्रव्याख्याने, कृसृभृवृ (पा.सू. ७-१-९१ ) इति सूत्रव्याख्याने च

प्रवचनकर्त्रा अन्यजनान् अभिलक्ष्यानवरतरूपेण कृतं प्रवचनमिवात्रापि विषयव्याख्यानकृतं दृश्यते । एतस्मादन्येषु विधिषु अनुवादप्रत्यक्षादयः सप्तविधयः प्राय आधुनिकविषयेषु शिक्षणक्षेत्रेषु च प्रसिद्धाः सन्ति अतस्तेषामुपयोगः प्राचीनपद्धत्या लिखितेषु व्याख्यानेषु पुस्तकेषु च प्रायो न उपयुज्यते । तत्र व्याकरणानुवादविधिस्तु यद्यपि तेभ्यः सप्तभ्यः सर्वथा भिन्नो व्याकरणविधिना सह सन्निकटश्च तथापि विधिरयं व्याकरणविषयसम्बद्धेऽनुवादे एव उपयुज्यते । छात्राणामनुवादकौशलप्रवर्द्धनाय व्याकरणविधिना द्वितीयभाषाशिक्षण- मनुवादसंज्ञापनं वाऽस्य कार्यं अतोऽस्मिन् व्याख्यानेऽस्य विधेरपि प्रयोगो न प्राप्यते ।

**परम्परितविधेः साधारणप्रयोगः**

शिक्षाविदा चिरञ्जीविशर्मणा स्वकीये *कक्षाप्रकोष्ठे मनोविज्ञानम् (Psychology in the Classroom)* नामके पुस्तके प्रायः पाश्चात्यमतानि सगृह्य शिक्षककेन्द्रितश्छात्र केन्द्रितान्तःक्रियात्मकश्चेति त्रयो विधयः समुल्लिखिताः । तेन शिक्षककेन्द्रितविधिषु प्रवचन- प्रदर्शनप्रश्नोत्तरपरामर्शश्चेति कृत्वा चत्वारो विधयः समुपदिष्टा दृश्यन्ते । तथैव छात्रकेन्द्रितविधिषु प्रयोगात्मक-शैक्षिकभ्रमणात्मक-सर्वेक्षणात्मक-गवेषणात्मक-समस्यासमाधानात्मक- सूक्ष्म-कार्ययोजनात्मक-व्यक्तिगताध्ययनात्मक-खोजमूलकश्चेति कृत्वा अष्टौ व्याख्याता दृश्यन्ते, अन्तःक्रियात्मकविधिषु परामर्शात्मकोपवेशात्मक-मूल्याङ्कनात्मक- वर्गीकरणात्मक- सूक्ष्मशिक्षणात्मक- समूहशिक्षणात्मकप्रदर्शनञ्चेति षड्विधय विवृताः सन्ति, एतेभ्योऽन्ये नाटकीयविधि-सामग्री-केन्द्रितविधिः" प्रभृतयोऽन्ये प्रचलिता विधयोऽपि सन्ति । एतेषु प्रायः प्राचीनपरम्परातोऽनुकृताः सन्ति, अतोऽत्र परम्परितविधित्वेनात्र समुल्लिखिताः वर्तन्ते । उपर्युक्तेषु परम्परितविधिषु शारदाप्रभाव्याख्यायां प्रायः शिक्षककेन्द्रिताः प्रवचनप्रदर्शन- प्रश्नोत्तरादयो विधयः प्रयुक्ताः दृश्यन्ते।

शारदाप्रभायां मूलतः शिक्षककेन्द्रितस्य प्रदर्शनविधेः प्रयोगो बहुधा प्राप्यते। व्याख्यात्रा ढ्लोपे पूर्वस्य दीर्घोऽणः (पा.सू.६-३-१११) इति सूत्रार्थं बोधयता, नामि (पा.सू.६-४-३) इति सूत्रमर्थापयता, चिणोः लुक् (पा.सू.६-४-१०४) इति सूत्रयोगेनेष्टरूपं साधयता, आदेशप्रत्यययोः (पा.सू.८-३-५९) इति सूत्रेण साधनीयं रूपं साधयताऽन्यत्र च प्रवचनविधेः प्रयोगः कृतः प्राप्यते। तेषु तेषु च सूत्रेषु क्रमशो वर्णितैर्दीर्घानुच्छेदैः तत्रत्या विषया प्रस्तुताः सन्ति। तस्मिन् क्रमे केभ्यः केभ्यश्च पूर्वसूत्रेभ्यः किं पदमावर्तते, अनुवर्तितं पदं तस्मिन् सूत्रे विभक्तिलिङ्गादिविपरिणामेन प्रयुज्यत उत यथावदेवोपयुज्यते, प्रकृतसूत्रमुत्तरसूत्रेण सह कथं सम्बद्धते, प्रकृतसूत्रस्योदाहरणानि प्रत्युदाहरणानि च कानि, प्रकृतसूत्रस्योत्तरत्र कीदृशी सम्बद्धता इत्यादयो विषया अत्र प्रवचनशैल्या वर्णिताः सन्ति। एतन्मध्ये क्वचित् परामर्शविधेरपि ईषत्सङ्केतोऽत्र प्राप्यते। व्याख्यातासौ क्वचिन्मनोगतं संवादं विधाय कतिपयान् विषयान् स्पष्टीकुरुते। कतिपयेषु स्थानेषु प्रश्नोत्तरविधेः प्रयोगोऽप्यत्र प्राप्यते । एते सर्वे परम्परिता विधयो वर्तन्ते।

**प्रश्नोत्तरपद्धतेः क्वचित्प्रयोगः**

शिक्षणप्रकोष्ठे शिक्षकेण छात्रेभ्यः प्रश्नपृच्छनम्, छात्रेभ्योत्तरप्रदानम्, छात्रेभ्य उपयुक्ते उत्तरे प्रदत्ते परिप्रश्नेन तेषां ज्ञानप्रवर्द्धनम्, त्रुटिपूर्णे उत्तर प्रदत्ते शुद्धीकरणेन तेषां धारण-संशोधनञ्चास्य प्रमुखं वैशिष्ट्यम्। ग्रीसदेशीयो दार्शनिकः सुकरातोऽस्य जन्मदाता मन्यते।

शारदाप्रभाव्याख्यायां सामान्यतः प्रश्नोत्तरात्मिका शैली गृहीता अस्ति । विप्रतिषेधे परं कार्यम् (पा.सू. १- ४-२) इति सूत्रे व्याख्याता आह- "विप्रतिषेधे विरोधे सति परं कार्यं भवति, इत्यर्थमुपदिश्य कतरत् सूत्रं प्रवर्तेत ? इति च्छात्रैरेव निर्णयः कारयितव्यः, यदिच्छात्राः सुपि च (पा. सू. ७-३-१०२) इति सूत्रं बाधित्वा बहुवचने झल्येत् (पा.सू. ७-३-१०३) सूत्रस्य प्रवृत्यापि कार्यं तु सम्पद्येत, कथं पुनर्विप्रतिषेधसूत्रस्यावश्यकता इति सन्दिह्युस्तदा शिक्षकेण वृद्धिरेचि (पा. सू. ६-१ - ८५) स्मारयता तत्रत्यं वृत्तद्वयदृष्टान्तोद्बोधनपुरस्सरं निरवकाशे बाध्यबाधकता भवति नान्यत्र इत्यादि बोधयेत। अत्र सूत्रव्याख्यानप्रसङ्गे सूत्रार्थमुपदिश्य उपर्युक्तस्थले कतरत् सूत्रं प्रवर्तत इति प्रश्नं पृष्ट्वा छात्रैरेव उत्तरणीय इति निर्दिष्टो वर्तते। तत्प्रसङ्गे प्रश्नोत्तरविधेः स्पष्टमुदाहरणं परिलक्ष्यते। प्रवचनप्रश्नोत्तराभ्यां व्यतिरिक्ताः शिक्षककेन्द्रिता अन्ये प्रदर्शन-परामरामर्शादयो विधयोऽत्र नाङ्गीकृताः सन्ति, यतो हि- प्रदर्शनविधेः प्रयोगः विद्यालयीयकक्षासु तत्रापि विज्ञान-कम्प्युटरादि प्राविधिकविषयाणां कर्मकाण्डायुर्वेदकृषिसदृशानां प्रायोगिकविषयाणां शिक्षण उपयुज्यते । तथैव परामर्शविधिः (Inquiry Method) तु कक्षायां पूर्वनिर्धारितप्रश्नद्वारा कक्षाणां जिज्ञासाप्रवर्द्धने तत्समाधाने च उपयुज्यते। अतो विधिरयं व्याख्यानग्रन्थे प्रायो न प्राप्यते ।

**परामर्शविधेर्बहुत्र प्रयोगः**

कस्यापि विषयस्य शिक्षणे व्याख्यातग्रन्थस्य विधिपरीक्षणे परामर्शविधिः (Discussion Method) उपयोगी भवति । अस्मिन् विधौ शिक्षकछात्राभ्यां विषयं परामृश्य विश्लिव्य च निष्कर्षो निष्पाद्यते । तत्र द्वावपि पक्षौ सक्रियौ भवत इति विषयावबोधने सारल्यमनुभूयते ।

शारदाप्रभायां स्पष्टतया परामर्शविधेः प्रयोगो नास्ति तथापि तत्र त्रिपक्षीयोऽप्रत्यक्षः परामर्शः प्राप्यते। व्याख्यातासौ कुत्रचिद् व्याख्यातृत्वेन शिक्षकेण सह परामृशति। तत्प्रसङ्गे विषयावबोधनाय एवं कुरु इति निर्दिशति, परामर्शशैलीद्वारा विषयं ज्ञापयति चेत् कतिपये स्थले अयि वत्स ! इत्यादि सम्बोधनद्वारा छात्रेण सह परामृशति, यद्यपि व्याख्यानेऽस्मिन् व्याख्याता एकाकी एव वर्तते तथापि तत्रत्येन परामर्शविधिना अस्मिन् संवादमूलकेऽध्ययनेऽपरोऽप्यस्तीति प्रतीयते, यथा- अनेकमन्यपदार्थे (पा.सू.२-२-२४ ) इति सूत्रे परामर्शद्वाराऽन्यपदं स्पष्टयति "अत्र अन्यपदार्थे (अन्यस्य पदस्य अर्थे) इत्यत्र कस्मात् अन्यस्य ? इति छात्राणामाकाङ्क्षायां सत्यां शेषशब्देन प्रथमान्तं गृह्यते इति तूक्तमेव । तदप्यत्राप्यनुवृत्या अनेकं प्रथमान्तमित्यर्थोऽपि स्फुट एव जातः। अतः अन्यस्य इत्यस्य प्रथमान्तादन्यस्य भिन्नस्य इत्यपि प्रायः स्फुटकल्पमेवेति बोधयेत् । अत्र परामर्शता स्पष्टं नास्ति तथापि तद्बोधने छात्रं परिकल्प्य तेषामाकाङ्क्षां च परिज्ञाय तत् शमनप्रयासो विधीयते, अतः परामर्शस्य सङ्केतोऽत्र द्रष्टुं शक्यते । तथैव भाववाच्ये युष्मदस्मद्भ्यां समानाधिकरण्याभावात् शेषे

प्रथमपुरुष एव भवति तथैव तिङ्वाच्यभावनाया असत्वरूपत्वेन द्वित्वाद्यप्रतीतेर्न द्विवचनादिकं सम्भवं किन्त्वेकवचनमेव, तस्यौत्सर्गिकत्वेन सङ्ख्यानपेक्षितत्वात्" इति वाक्यस्यार्थं परामर्शद्वारैवं सूचयति- अथ शिक्षकः परीक्षेत मया हस्यते इत्यत्र मया इति अस्मच्छब्दे उपपदे सत्यपि कथं नोत्तमपुरुषः ? त्वया हस्यत इत्यत्र त्वयेति युष्मच्छब्द उपपदे सत्यपि कथं न मध्यमपुरुषः ? रामश्यामविष्णुमित्रैर्हस्यते इत्यत्र कर्तृषु बहुषु सत्सु अपि हस्यते इत्येकवचनान्तं क्रियापदं कथं ? कथन्न बहुवचनान्तता ? अत्रैतादृशान् प्रश्नान् समुपस्थाप्य तत उत्तरमपि प्रदत्तमस्ति तत् सर्वं परामर्शविधिना विहितत्वादत्र परामर्शस्य बहुत्र प्रयोगोऽस्तीति वक्तुं शक्यते।

**निर्देशवाक्यानामाधिक्यम्**

व्याख्यातासावत्र स्मारं स्मारं शिक्षकान्, छात्रान् च इत्थं शिक्षणीयमिति अवबोधयति, विषयज्ञापनविधिं च निर्दिशति । विधिनिर्देशविषये ग्रन्थभूमिकायां सावधानम् इति शीर्षकद्वारा एवं सङ्केतयति- अत्र निदर्शितरीतेर्भावमधिगम्य शिक्षकेणाष्टाध्याय्यां सूत्राणि दर्शयता छात्रा उपदेश्या अत्रत्या पङ्क्यो न वाचनीयाः। शिक्षकसुविधायै यद्यप्यत्र सूत्राध्यायपादक्रमाङ्कः सह सूत्राणमानुपूर्वी च प्रवृत्ता अस्ति, तथापि शिक्षकैः छात्राणमुपदेशेत्वध्यायपादक्रमाङ्का एव लेखयितव्याः, न तु सूत्रानुपूर्वी, आनुपूर्व्यां लेखितायां तस्यामेव लेख्यपुस्तिकायामभ्यसन्ति, नाष्टाध्याय्यां, ततश्च छात्रमस्तिष्केऽध्यायपादक्रमाङ्काः न स्फुरन्ति, स एष महान् दोषो बोध्यः । छात्रैः स्वयमेव पुस्तकमवलोक्य व्याकरणशिक्षणप्रयासो न कार्यः, किन्तु प्रकृतग्रन्थोक्तरीत्या गुरुमुखादेव व्याकरणं शिक्षणीयमिति।

एतद्विधानि निर्देशवाक्यानि प्रकृतग्रन्थेऽन्यत्रापि यत्रतत्र दृश्यन्ते । अष्टाध्यायीक्रमेण सूत्रं पाठनीयमिति निर्दिशन् व्याख्याकारोऽयं सूत्राणामानुपूर्वी गोपयितव्येति सङ्केतयति। सूत्रक्रमनिर्देशेऽपि इतश्च (पा.सू. ३-४-१००) सूत्रानन्तरं विधिनिमन्त्रणा... (पा.सू. ३ - ३ - १६१) इति सूत्रं पाठ्यमिति अप्रत्यक्षतया निर्दिशति, लः कर्मणि च भावे चाऽकर्मकेभ्यः" (पा.सू.३-४- ६९) इति सूत्रव्याख्याने सम्यग् ज्ञानम्" इति शीर्षकद्वारा उत्साहोद्भावनामिति शीर्षकेण च सकर्मकाकर्मकयोर्बोधः कथं सम्पद्यत इति बोधयति, तथैव प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा (पा.सू. २-३-४६ ) इति सूत्रे सूत्रार्थख्यापन- सन्दर्भे छात्रनिर्देश एवं कृतो दृश्यते- सूत्रेऽस्मिन् लिङ्गपरिमाणवचन" इत्यंशस्य साम्प्रतं विचारो न कार्यः। (पुनश्च शिक्षकं निर्दिशन् ) द्वितीयावृत्तौ तु लिङ्गमात्राधिक्ये। परिमाणमात्रे वचनमात्रे (सङ्ख्यामात्रे) च इत्याद्यर्थ उपदेश्यः । इत्थं प्रकारेण कुत्रचित् छात्रं क्वचिच्च शिक्षकं निर्दिष्टमुदाहरणं व्याख्यानेऽस्मिन् प्रतिपृष्ठं प्राप्यते । संस्कृतव्याकरणस्यान्यदीयासु टीकासु कुत्रापि एतादृशो निर्देशो प्रायो न प्राप्यते । तत्र व्याख्यातारः क्रमशो विषयं विवृण्वन्ति परमसौ व्याख्याकृत्तु प्रतिविषयं प्रतिसमस्यां च शिक्षकान् निर्दिशन् छात्रेभ्योऽनेन प्रकारेण पाठनीयम्, विषयोऽयं बोधभारात् छात्रेभ्यो नाध्यापनीयः, एतत् सूत्रादनन्तरमेतत् पाठ्यताम् इत्याद्युपदिशति, तथैव अयि वत्सा, शिष्या, इत्यादिसम्बोधनद्वारा छात्रानभिमुखीकृत्य प्रासङ्गिकविषयान् संज्ञापयति, एतावत् मात्रं पाठ्यताम्, अनुपूर्वी वृत्वा सूत्रसमूहेभ्य आनुपूर्वी संयोजनमादेश्यम्, एतादृशैर्निर्देशनैर्व्याख्याकारोऽयं शिक्षणक्रियाकलापाय च प्रेरयतीति निश्चीयते।

**शारदाप्रभायां निर्दिष्टानां शिक्षणविधीनां विषयवस्तुना सह सामञ्जस्यम्**

शारदाप्रभायां टीकायामुपरि समुल्लिखिता निगमनव्याख्यानप्रश्नोत्तरादयः केचन विधयः स्पष्टतया प्रयुक्ता दृश्यन्ते, तेषां विषयवस्तुना सह समवायसम्बन्धतुल्यः मेलोऽपि संलक्ष्यते। इतरे वैज्ञानिक-व्याकरण-प्रश्नोत्तर-प्रयोगात्मक-सर्वेक्षणात्मक-कार्ययोजनाप्रभृतयो विधयः क्वचित् सामान्यतः क्वचिच्च सङ्केतरूपेणैव विषयवस्तुना सह सामञ्जस्यं भजन्ते। अत्रैतेभ्यो मुख्यानां सामान्यचर्चा विधीयते।

अत्र प्रयुक्तस्य निगमनविधेः सामञ्जस्यं विषयवस्तुना सह स्पष्टतया परिलक्ष्यते। आचार्येण पाणिनना सूत्रोदाहरणप्रत्युदाहरणक्रमेणाष्टाध्यायी विरचिता। सा चाष्टाध्यायी काशिकाप्रक्रियाकृद्भिरनेकैर्व्याख्यातृभिरपि निगमनशैल्या एव व्याख्याता। तदनु रचिता टीकाटीप्पण्योऽपि निगमनशैल्या एव टीकिता दृश्यन्ते। अस्मिन् क्रमे शारदाप्रभाव्याख्यात्राप्यमुमेव क्रममाश्रित्य व्याख्यानग्रन्थोऽयं ग्रथितः। एतेन निगमनपद्धत्या सह प्रकृतं व्याख्यानं समवायसम्बन्धतुल्येन सम्बन्धेन सामञ्जस्यं भजते। पूर्वव्याख्यानेष्विवात्रापि प्रथमतः सूत्रोल्लेखस्तदनु पदच्छेदः ततः पदार्थप्रकाशनम् तदनन्तरं भावस्पष्टीकरणमुदाहरण- प्रत्युदाहरणदानं शङ्कासमाधानञ्चेति क्रमः परिपालितः प्राप्यते। अस्योदाहरणं प्रकृतव्याख्यानस्य- शालीनकौपीने अधृष्टाकार्ययोः (पा.सू. ५-२-२०) इति सूत्रे द्रष्टुं पार्यते। व्याख्यातायं मूले प्रथमतः- शालाप्रवेशमर्हति शालीनो जडः, कूपपतनमर्हति कौपीनं पापम्, पापसाधनत्वात् कौपीनं पुरुषलिङ्गं तत्सम्बन्धात् तदाच्छादनञ्चेति सङ्केतयित्वा व्याख्यानखण्डे पदच्छेदव्याख्यानादिभिर्विषयमिमं विशदयति, तद्यथा- अधृष्टाऽकार्ययोः= अप्रगल्भे अकरणार्हे च वाच्ययोः, शालीनकौपीने=शालीनकौपीनशब्दौ खञ्प्रत्ययान्तौ निपात्येते। द्वयोरप्युदाहरणयोः खञ्प्रत्यय उत्तरपदलोपश्च निपात्येते। शालाप्रवेशमिति- अप्रागल्भ्यादन्यत्रासितुमसमर्थः शालामेव प्रवेष्टुमर्हतीत्यर्थः (शर्माचार्यः, २०६०, पृ.३७०)। अत्रत्ये मूले सूत्रमनूदाहरणद्वयं प्रस्तुत्यं तयोरर्थस्तन्निर्धारणकारणञ्च प्रकाशितम्। ततः सूत्रे स्थितस्य पदद्वयस्यार्थः पर्यायप्रयोगेण समुल्लिखितः पदानुवृत्तिसङ्केतेन सूत्रार्थः पूरितश्च। पुनर्निपातनप्रक्रियया विग्रहकाले समागतमुत्तरपदं लुप्यत इति सङ्केतितश्च। ततः शालीनपदस्य मूर्खत्वव्यवहारकारणं- अप्रागल्भ्यादन्यत्रेति वाक्येन पोषितञ्च। एतानि सर्वाण्यपि व्याख्यानानि सूत्रमनु जातानि, विषयेण सहैतेषामभेदवत् सामञ्जस्यं घटते चेत्यधिकृत्य समवायवत् सामञ्जस्यं वर्तत इति निर्णीयते।

शारदाप्रभायां विषयव्याख्यानस्य परम्परितो विधिः परिपालितो दृश्यते। परम्परित- व्याख्यानविधिना निर्धारितानि पदच्छेदपदार्थोक्तिप्रभृतीनि तत्त्वान्यत्र पूर्णतः परिपालितानि सन्ति। यद्यपि सकलसूत्रव्याख्यानेषु- पदच्छेदः, पदार्थोक्तिः, विग्रहः, वाक्ययोजना, आक्षेपः, समाधानम् चेति षण्णामेव तत्त्वानां पूर्णतः परिपालनं नास्ति, तच्च क्वचिद् विस्तारभीत्या क्वचिच्चानावश्यकमनुभूयापि सर्वत्र न प्रयुक्तानि सन्ति। आवश्यकेषु स्थानेषु व्याख्येयतत्त्वानां यथासम्भवं प्रयोगो व्याख्यात्रा साधुतया कृतो वर्तते। व्याख्यात्रा पूर्वोक्तानां तत्त्वानां प्रयोगः कथं कृत इति बोधाय कानिचनोदाहरणान्यत्र प्रस्तूयन्ते-

सर्वैकान्यकिंयत्तदः काले दा (पा.सू. ५-३-१५) इत्यस्य व्याख्या-

क) सूत्रोपन्यासः- सर्वैकान्यकिंयत्तदः काले दा ।

ख) उदाहरणम्- सदा, सर्वदा, एकदा, अन्यदा, कदा, यदा, तदा ।

ग) निषेधक्षेत्रबोधः- काले इत्युक्तेर्नेह- सर्वत्र देशे।

घ) अनुवृत्तिसङ्केतः- सप्तम्यास्त्रल् (पा.सू.५-३-१०) इति सूत्रानन्तरं सूत्रमिदं पाठ्यम्।

ङ) सूत्रार्थः- सर्वैः... तदः= सर्व एक अन्य किं यत् तद् इति प्रकृतिकाद्, सप्तम्याः (पा.सू.५-३-१०) काले=समयेऽर्थे, दा=दाप्रत्ययो भवति।

च) उत्तरत्रसम्बन्धनिर्देशः- अथ (पा.सू.५-३-६) सर्वस्य सोऽन्यतरस्यां दि इति सूत्रमुपदिशेत् (शर्माचार्यः, २०६०, पृ.३९२)।

उपरि समागतानि सूत्रोपन्यासोदाहरणादीनि काशिकायां तद्व्याख्यायां प्रक्रियाकौमुद्यां सिद्धान्तकौमुद्यामन्यत्र च दृश्यन्ते। तत्रत्यैर्व्याख्यातृभिरपि पाठकैरपेक्षितं कठिनं विषयवस्तु एव व्याख्यातं दृश्यते। भाषायां विषयप्रतिपादनपद्धत्यादिषु च क्वचित् सारल्यं क्वचिच्च जाटिल्यं भवितुं शक्नोतीति तद् व्याख्यातुः शैलीविशेषो मन्तव्यः। विषयप्रतिपादनस्य क्रमः, सरलतायां सत्यां तत्त्यागः कठियायां च विशेषविवृतिपूर्वकं व्याख्यानं व्याख्यान्तराणामुपन्यास इत्यादि सर्वत्र समानम्। प्रकृतव्याख्यानेनापि पूर्वप्रयुक्तां सरणिमाश्रित्य परम्परितया पद्धत्या विषयव्याख्यानं कृतमिति हेतोः व्याख्यानपद्धत्या सहात्र स्थितस्य विषयवस्तुनः सामञ्जस्यं प्रकर्षेण वर्तत इति निश्चीयते।

इतोऽन्ये प्रवचनप्रश्नोत्तरादयो विधयोऽपि प्रकृते व्याख्याने दृश्यन्ते। विषयव्याख्यानस्य प्रवचनशैली प्राचीनाः पाणिन्यादिभिर्मुनिभिः प्रयुक्ता गभीरा च वर्तते। व्याकरणमहाभाष्ये क्वचित् प्रवचनस्य क्वचिच्च प्रश्नोत्तरस्य सुष्ठु शैली प्रयुक्ता दृश्यते । यद्यपि तादृशी पद्धतिर्दीर्घेषु, लम्बेषु च विषयप्रतिपादनेषु तथा शास्त्रार्थसंवादादिषु च सौष्ठवायते तथाप्यत्र व्याख्यात्रा- तस्य भावत्वतलौ (पा.सू.५-१-११८), उपदेशेऽत्वतः (पा.सू.७-२-६२), ऋतो भारद्वाजस्य (पा.सू.७-२-६३), वृद्धिरेचि (पा.सू.६-१-८५), हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल् (पा.सू.६-१-६६) इत्यादिषु सूत्रेषु प्रयुक्ता वर्तते। तत्र वैषयिकगाम्भीर्येण व्याख्यात्रा क्वचित् प्रवचनमाध्यमेन क्वचिच्च प्रश्नोत्तरशैल्या विषयवस्त्वनुकूलं पद्धतिप्रयोगः कृतः। प्रवचनमध्ये छात्रेष्वविद्यमानेष्वपि व्याख्यातायं अग्रे छात्रा वर्तन्त इति प्रकल्प्य विषयान् प्रस्तौति, अतोऽत्र प्रवचनप्रश्नोत्तरादिष्वपि विषयवस्तुना सह सामान्यं सामञ्जस्यं भजते। यद्यपि प्राथमिकान् छात्रान् संलक्ष्य रचितेऽस्मिन् व्याख्याने दीर्घप्रवचनं वैषयिकगभीरं च छात्रभाराय भवतीति निश्चितमेव तथापि सामान्यं सामञ्जस्यं द्रष्टुं पार्यत इति निष्कर्षः।

**शारदाप्रभाव्याख्यानेन निर्दिष्टानां शिक्षणपद्धतीनां युक्त्यादीनाञ्चोपयोगित्वम्**

शारदाप्रभाव्याख्यानेन निर्दिष्टाः शिक्षणपद्धतयः, सामग्र्यः शैक्षणिकयुक्तयश्चोत्तरवर्त्तिसु पाठकेषु व्याख्यातृषु चोपयोगिन्यः प्रतीयन्ते। पूर्वव्याख्यानानि वैषयिकसमुद्रेऽन्तः प्रविष्टुं ततो शास्त्रीयमौक्तिकादिकमानेतुं च कामयन्ते स्म परमस्य व्याख्यानस्योद्देश्यं तेभ्यो भिन्नं वर्तते। व्याख्यानमिदं तु हिन्दीनेपालीमिश्रितया सरलया संस्कृतगिरा, वर्णनव्याख्यानप्रधानशैल्या, शैक्षणिकसामग्रीप्रयोगेण च, शिक्षणस्याधुनिकीं प्रयुक्तिं प्रयुज्य च संस्कृतव्याकरणपठनतः

पलायमानान्, संस्कृतव्याकरणे प्रविष्टुकामाँश्च छात्रान् तत्राकर्षयितुं प्रयतते । तस्मिन् प्रयासे भाषासु सरलतायामपेक्षितायामपाणिनीयान् संस्कृततुल्यान् परमसंस्कृतानपि शब्दान् यत्रतत्र प्रयुङ्क्ते। क्वचिदसंस्कृतान् नेपालीहिन्दीशब्दानपि संस्कृतीकुरुते। एतत्सर्वं वैषयियकसरलतायै कृतमित्याभाति। अतोऽस्य व्याख्यानस्य लक्षितसमूहः भिन्नः, काशिकाप्रौढमनोरमातत्त्वबोधिनी- बालमनोरमादीनाञ्च भिन्न इति मन्तव्यः।

शारदाप्रभाव्याख्यानेनात्र प्रयुक्तैर्निगमनवैज्ञानिकव्याख्यात्मकप्रश्नोत्तरादिभिः सार्वकालिकै र्विधिभिः प्रकृतग्रन्थोऽप्युपकृतो दृश्यते। यतो हि एतावद्भिर्विधिभिरेवास्य व्याख्यानस्य शैक्षणिकोपयोगित्वं प्रवर्द्धितमस्ति। व्याख्यानमिदं सर्वबोध्यं सरलञ्च जातमस्ति। विधिसरण्यादिकमविचार्य व्याख्याता ग्रन्थाश्छात्रेभ्यो पर्वतायन्ते स्म, येन कारणेन कोमलमतिवन्तः प्रविविक्षवः पाणिननीयं व्याकरणं महत् कठिनमिति भाषमाणः पलायन्ते स्म। एतेन सकलाष्टाध्यायी सरलीकरणे तदानीं (विक्रमस्य २०६० तमे वर्षे) कृतः प्रयासः स्तुत्यो मन्तव्यः। यद्यपि प्रचारप्रसारयोरभावेन प्रकृतव्याख्यानमेतेन कृतं स्तुत्यं कार्यमपि नेपालसंस्कृतविश्वविद्यालयेऽन्यत्र च प्रकाशितो न दृश्यते तथापि भविष्यति प्रकाशितं भविष्यति, छात्रा लाभान्विता भविष्यन्तीति आशास्यते। पाणिनीये व्याकरणेऽद्यावधि प्रकाशितेषु भारतीयेषु नैपालेषु च प्रायो व्याख्यानेषु शिक्षणविधिप्रयुक्तं युक्त्यादिनिर्दिष्टञ्च व्याख्यानमेतत् प्रथमं प्रतीयते। यतो हि पाणिनीये व्याकरणेऽपि शिक्षाक्षेत्रेऽपि समानविज्ञतां लभमाना विद्वाँसो लोके विरला एव लभ्यन्ते तादृशेषु विद्वत्सु हरिप्रसादोऽप्येकः, अतोऽनेन विध्यादिनिर्देशेन कृतं व्याख्यानमपि छात्रहिताय भविष्यतीति निश्चितम्। अत्र एकः प्रश्नो जागर्ति- तर्हि कैः कैश्च विश्वविद्यालयैर्गुरुकुलैर्वा प्रकृतं व्याख्यानं प्रयुङ्क्तमिति ? निश्चितमेवैकेनापि शिक्षणसंस्थानेन प्रकृतमद्यावधि न प्रयुक्तम्, तस्यार्थ एतत् अनुपयोगि इत्यपि न । गुहायामवस्थितः तापस इव प्रकृतव्याख्यानमपि विदुषां शिक्षाशास्त्रिणाञ्च पुरतो न सम्प्राप्तमिति मन्तव्यम्। अत्र महाकवेर्भारवे वच आश्रित्य धैर्यं धारणीयम्, यतो हि-

ये नाम केचिदिह न प्रथयन्त्यवज्ञाम्।
जानन्ति ते किमपि तान्प्रति नैष यत्नः।
उत्पत्स्यते मम तु कोऽपि समानधर्मा ।
कालो ह्ययं निरवधिर्विपुला च पृथ्वी (भवभूतिः, ई. १९३६, पृ.१-८) ।।

तथाविधाः बह्व्यः सामग्र्यः कालान्तरे प्रचारपथमागता अपि दृश्यन्ते अतो व्याख्यानमिममपि समयोऽवश्यं प्रचारपथमानेष्यतीति विश्वस्यते।

शारदाप्रभाकारेणैकत्रकृतेन प्राथमिकद्वतीयक्रमयोः संयोजनेन यद्यपि ग्रन्थबोधो तन्तुवायजालायते। कुतः प्रवेष्टव्यं कस्मात् स्थानाच्च बहिर्गन्तव्यमिति प्रवेशकाले काठिन्यमनुभूयते। तथापि यथाकथञ्चित् प्रविष्टे तत्र प्रयुक्तेन व्याख्यानविधिना, मार्गनिर्देशसरण्या, ग्रन्थसरलीकरणाय प्रयुक्त्या युक्त्या च पश्चात् सारल्यमनुभूयते । शारदाप्रभावयां प्रयुक्ताः- स्वरितचिह्नानुनासिकचिह्नसूत्रसङ्केतनिर्देशानुबन्धफलोपदेशा विषयव्याख्यानाय विधिसरण्यादिबोधाय च सहयोगं कुर्वन्ति। तथैवात्र प्रकृतव्याख्यात्रा शिक्षाशास्त्रे प्रयुक्तानामनेकासां मान्यतानां पालनं यथाविधि विहितमस्ति। अत्र

उत्प्रेरणादृष्टान्तोदाहरणमूल्याङ्कनादीनां प्रयोगः, प्राथमिकेभ्यो विशिष्टेभ्यश्च छात्रेभ्यः स्तरानुकूलं विषयचयनम्, विषयस्तरीकरणम्, भाषाप्रयोगे शब्दभाण्डागारचयनेऽवधानता, पाठ्यवस्तुविन्यासे रैखिकता चेत्यादीनां सरणियुक्तिपद्धत्यादीनां परिपालनं सम्यक्तया जातं दृश्यते। एतैः शैक्षणिकोपकरणप्रयोगैर्व्याख्यानमिदं शैक्षणिकदृष्ट्या समृद्धं जातमस्योपयोगित्वं सुतरां प्रवर्धितमिति वक्तुं शक्यते।

**निष्कर्षः**

कतिषु क्षेत्रेषु विधिपद्धत्योर्भिन्नेषु सन्दर्भेष्वर्थेषु सत्स्वपि प्रकृतव्याख्याने शब्दद्वयं पर्यायत्वेन प्रयुक्तमस्ति। तस्माद्भिन्नत्वेन व्याख्यानशैलीपथत्वेन क्रमत्वेन चात्र सरणियुक्तयः प्रयुक्ताः सन्ति। प्रकृतमध्ययनं शारदाप्रभाव्याख्यानेन पाणिनीयव्याकरणशिक्षणाय प्रयुक्तायाः पद्धत्याः समीक्षणे केन्द्रितं वर्तते। अतोऽत्र शारदाप्रभाव्याख्यानेन पाणिनीयव्याकरणशिक्षणाय प्रयुक्ताः पद्धतयो युक्तयश्चोपयुक्ता वर्तन्ते नवेति विवेचनमस्य मुख्यं विषयवस्तु। एतदर्थं प्रकृतेन व्याख्यानेनाष्टाध्यायीशारदाप्रभायां टीकायां काः काश्च शिक्षणपद्धतयः युक्तयश्च प्राप्यन्ते ? तादृशीनां पद्धत्यादीनां व्याख्येयविषयेण सह कीदृशं सामञ्जस्यमस्ति ? एभिः पद्धतिभिर्युक्तिभिश्च को लाभ इति शोधप्रश्नं समुत्थाप्य समग्रेऽध्ययन एतेषामुत्तराण्यन्विष्टानि सन्ति। तदध्ययनेन च शारदाप्रभायां व्याख्यायां निगमनव्याख्यानप्रवचनप्रश्नोत्तरविधीनां सुष्ठु प्रयोगः प्रकृते व्याख्याने प्राप्यते चेद् वैज्ञानिकव्याकरणपरम्परितानामन्येषां विधीनां साधारणप्रयोगः प्राप्यत इति निष्कर्षः प्राप्यते। तथैव उत्प्रेरणादृष्टान्तोदाहरणमूल्याङ्कनादीनां प्रयोगः, प्राथमिकेभ्यो विशिष्टेभ्यश्च छात्रेभ्यः पृथक् पृथक्तया स्तरानुकूलं विषयचयनम्, विषयस्तरीकरणम्, भाषाप्रयोगे शब्दभाण्डागारचयनेऽवधानता, पाठ्यवस्तुविन्यासे रैखिकता चेत्यादीनां सरणियुक्तिपद्धत्यादीनां परिपालनञ्च सम्यक्तया जातं दृश्यते। एवमेवात्र निगमनव्याख्यानप्रश्नोत्तरादीनां विधीनां प्रयोगसामञ्जस्यं सुदृढमितरेषान्तु सामान्यमस्तीति प्रकृतेनाध्ययनेन प्राप्तो निष्कर्षः। तथैव व्याख्यानमिदं प्रथमतः सूत्रवार्तिकादिकं व्याख्याय तत उदाहरणप्रत्युदाहरणानि शङ्कासमाधानादीनि च प्रस्तौति । प्रवचनपूर्णायां शैल्यां तत्रत्यविषयान् लेखनमाध्यमेन पुनः पुनरभ्यासकरणाय प्रेरयति । एतत् सर्वमाचार्यैः प्रवचनकाले प्रयुक्ता सरणिः, तदेव प्रवचनं प्रश्नोत्तरञ्च सङ्कलय्याष्टाध्यायीग्रन्थोऽयं ग्रथित इति येन वर्त्मनाऽऽचार्येण मूलग्रन्थो व्यरचि तेनैव मार्गेण व्याख्यात्रापि प्रकृतव्याख्यानप्रयासो विहित इति प्रकृतपथा बोधेषु सरलताऽऽयातीति निश्चीयते। प्रकृतव्याख्यानम्, अनेन प्रयुक्तो विधिः सरणिश्च प्राथमिकेभ्यो भिन्नशैल्या द्वितीयकेभ्यश्च तस्माद् भिन्नशैल्या क्रमेण वा ग्रथिता वर्तते । अतः सहस्राधिकपृष्ठसंरचिते प्रकृते विशाले ग्रन्थे प्राथमिकैः छात्रैः कथं प्रविष्टव्यमिति संशयः प्राथमिके क्षणे जायते तथापि ग्रन्थे प्रविष्टे सरलभाषया, निर्देशप्रधानया शैल्या, तत्र स्पष्टतया निर्धारितेन क्रमेण, व्याख्यात्रा कृतेन पूर्णेन व्याख्यानेन च जिज्ञासवः सहसा आकर्षिता भवन्त्येव, अस्मात् कारणात् शैक्षणिकयुक्तिप्रविधिप्रयोगदृष्ट्या सञ्जातं प्रथमं व्याख्यानमेतद् इति वक्तुं शक्यम् । अतोऽसौ पाठकलाभदायकं छात्रोपयोगि च वर्तत इति निश्चीयते । यद्यपि अत्र विन्यस्तेन प्राथमिकद्वितीयकक्रमसङ्गमेन ग्रन्थोऽयं ऊर्णनाभजालतुल्यं जातमित्याक्षिप्यते तथापि ग्रन्थे प्रविष्ट तथा नानुभूयते सरलतया विषयबोधं कर्तुं पार्यत इति निष्कर्षः।

## सन्दर्भ सामग्री

अमरसिंह (१९९७), *नामलिङ्गानुशासनं नामामरकोशः,* चौखम्बा संस्कृत प्रतिष्ठानम्।

आप्टे (१९९३), *संस्कृत हिन्दी कोशः*, मोतीलाल बनारसीदास।

पौडेलः, माधवप्रसादः (२०६७), *भाषापाठ्यक्रम, पाठ्यसामग्री तथा शिक्षणपद्धतिः*, विद्यार्थी पुस्तकभण्डार।

भट्टराईः, भवानीशङ्करः (२०७२), 'अष्टाध्यायीशारदाप्रभाव्याख्यायां शिक्षाशास्त्रोक्तपद्धति- विमर्शः' *प्रभा* (सामयिकी १४), पिण्डेश्वरविद्यापीठ।

भट्टराईः, भवानीशङ्करः (२०७५), *शब्दशास्त्रीयव्याख्यानतत्त्वदृष्टाऽष्टाध्यायीशारदाप्रभा- व्याख्यायाः समीक्षणम्* (विद्यावारिधिशोधप्रबन्धः), नेपालसंस्कृतविश्वविद्यालयः।

भट्टोजिदीक्षितः(१९९६), *वैयाकरणसिद्धान्तकौमुदी* (प्रथमो भागः), चौखम्बा सुरभारती प्रका.।

भवभूतिः (ई.१९३६), *मालतीमाधवम् (नाटकम्), पाण्डुरङ्गजावजी।*

लम्सालः, रामचन्द्रः तथान्ये (२०६२), *नेपालीभाषाशिक्षणम्* , भुँडीपुराण प्रकाशन ।

शर्मा, केदारप्रसादः (२०६०), *नेपाली भाषा र साहित्यशिक्षण,* न्यू हिरा बुक्स इन्टरप्राइजेज।

शर्मा, चिरञ्जीवी तथान्ये (२०६३), *कक्षा कोठामा मनोविज्ञान,* एम.के. पब्लिसर्स एण्ड डिस्ट्रीव्युटर्स ।

शर्मा, मोहनराजः (२०५२), *शोधविधि,* साझाप्रकाशन।

शर्माचार्यः, हरिप्रसादः (२०६०) *अष्टाध्यायी* (शारदाप्रभाव्याख्या महिता), म. सं. वि.।

सिग्द्यालः, सोमनाथः (२०१७) *प्रतिसंस्कृतासिद्धान्तकौमुदी,* लेखक स्वयम्।